# Shyama Upanishad

# શ્યામોપનિષત્

## Document Information

Text title : shyAmopaniShat

File name : shyAmopaniShat.itx

Category : upanishhat, devii, devI, upanishad

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : March 20, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 20, 2020

*sanskritdocuments.org*

# શ્યામોપનિષત્

ૐ ક્રીં અથ હૈનાં બ્રહ્મરન્ધ્રે બ્રહ્મસ્વરૂપિણીમાપ્નોતિ સુભગાં
શુભધાતુકામરેફેન્દિરાસમષ્ટિરૂપિણીમેતત્ત્રિગુણમાદૌ તદનુ
કૂર્ચબીજદ્વયં વ્યોમષષ્ઠસ્વરબિન્દુમેલનરૂપં તદનુ ભુવનેશીદ્વયં
ભવતુ વ્યોમજ્વલનેન્દિરાશૂન્યમેલનરૂપં તતો દક્ષિણે કાલિકે
ચેત્યપિ તતો મુખબીજસપ્તકમુચ્ચાર્ય બૃહદ્ભાનુજાયામુચ્ચરેત્ ।
અયં સ મન્ત્રોત્તમઃ । ય ઇમાં સકૃજ્જપન્ સ તુ દેવેશ્વરઃ ।
સ તુ વિશ્વેશ્વરઃ । સ તુ નારીશ્વરઃ । સ તુ સર્વગુરુઃ ।
સ તુ સર્વનમસ્યઃ । સ તુ સર્વવેદૈરધીતો ભવતિ । સ સર્વેષુ
તીર્થેષુ સ્નાતો ભવતિ । સ સ્વયં સદાશિવઃ । ત્રિકોણં ત્રિકોણં
ત્રિકોણં ત્રિકોણં પુનશ્ચૈવ ત્રિકોણં સાષ્ટપત્રં સકેસરં
ભૂપુરૈકેણ સંયુતં તસ્મિન્દેવીં હૃલ્લેખામઙ્ગે વિન્યસ્ય ધ્યાયેત્ ।
અભિનવજલદનીલા કુટિદંષ્ટ્રાવરાભયખડ્ગમુણ્ડસહિતહસ્તા કાલિકા
ધ્યેયા । કાલી કપાલિની કુલ્લા કુરુકુલ્લા વિરોધિની વિપ્રચિત્તેતિ બહિઃ
ષટ્કોણગાઃ । ઉગ્રા ઉગ્રપ્રભા દીપ્તા નીલા ઘના વલાકા માત્રા મુદ્રા
અમિતેતિ નવકોણગાઃ । બ્રાહ્મી નારાયણી માહેશ્વરી ચામુણ્ડા વારાહી
નારસિંહી કૌમારી ચાપરાજિતેત્યષ્ટપત્રગાઃ । ચતુષ્કોણેષુ ચત્વારો
માધવરુદ્રવિનાયકસૌરાઃ । દિક્ષુ દિક્પાલાઃ । દેવીં સર્વાઙ્ગેણાદૌ
સમ્પૂજ્ય ભગોદકેન તર્પણં પઞ્ચમકારેણ પૂજનમેતસ્યાઃ । એવં
દ્વિત્રિક્રમેણ કુર્વાણા મુનયો ભવન્તિ । નારિમિત્રાદિલક્ષણમસ્યવર્તતે ।
અમુષ્યા મન્ત્રપાઠકસ્ય ગતિરસ્તિ । નાન્યસ્યેહ ગતિરસ્તિ ।
એતસ્યાસ્તારામનોર્દુર્ગામનોસ્સુન્દરીમનોર્વા સિદ્ધિરિદાનીમ્ । સર્વાઃ સુપ્તા
ભૂતાઃ । અસિતાઙ્ગી જાગર્તિ । ઇમામસિતાઙ્ગ્યુપનિષદં યોઽધીતે
અપુત્રી પુત્રી ભવતિ । યોઽન્યસ્ય વરદો દૃષ્ટ્યા જગન્મોહયેત્ ।
ગઙ્ગાદિતીર્થક્ષેત્રાણામગ્નિષ્ટોમાદિયજ્ઞાનાં ફલભાગીયતે ॥

(શાક્ત-ઉપનિષદઃ)

ઇત્યાથર્વણે સૌભાગ્યકાણ્ડે શ્યામોપનિષત્ સમાપ્તા ।

Proofread by Kasturi navya sahiti

*Shyama Upanishad*
pdf was typeset on March 20, 2020

Please send corrections to *sanskrit@cheerful.com*